श्रीगणेशायनमः॥ ॥हरिः ॐ॥ भगवत्पादपादादिकेशस्तुत्यामधुस्रुतः। व्याख्यावितन्वतेरम्यानाम्नासौस्तवबोधिनी॥१॥ श्लोकः॥ लक्ष्मी
भर्तुर्भुजाग्रेकृतवसतिसिंतंयस्यरूपंविभालंनीलाद्रेस्तंगशृंगस्थितमिवरजनीनाथबिंबंविभाति॥ पायान्नः पांचजन्यः सदितिस्तकुलत्रासनैः
पूरयन्स्वैर्निध्वानैर्नीरदोघध्वनिपरिभवदैरंबरंकेचुराजः॥१॥ टीका॥ इहखलुसकलजगदनुग्राह्यस्वेच्छाकृतविग्रहपरिग्रहाः परमकारु
णिकाग्रगण्याः सर्वज्ञशिरोमणयः श्रीशंकरभगवत्पूज्यपादाः श्रीमत्कृष्णद्वैपायनप्रणीतब्रह्मसूत्रव्याख्यानरूपंश्रीमद्भाष्यंकरणेनमुमुक्षु
जिज्ञास्यंजगज्जन्मादिकारणंसकलोपनिषद्गम्यंसच्चिदानंदाद्वयंप्रत्यगभिन्नंविष्णाख्यंब्रह्ममुख्याधिकारिभ्यः करतलवदरवत्स्फु
टंप्रदर्शयंतोमंदाधिकारिणामनुजिघृक्षयानिर्विशेषंपरंब्रह्मसाक्षात्कर्तुमनीश्वराः॥ येमंदास्तेनुकंपंतेसविशेषनिरूपणेरितिन्यायेनत
स्यैवपरमतत्त्वस्यश्रुतिस्मृतिपुराणवचनैः शरीरसंपरिग्रहत्वेनसात्विकसेव्यत्वेनचाधिगतस्यशंखचक्रगदा-नंदककौमोदकीरूपपं
चायुधालंकृतस्यगरुडवाहनस्यशेषशायिनः श्रीमल्लक्ष्मीभूमिदेवीसमेतस्यकौस्तुभश्रीवत्समुक्ताभरणभूषितस्य किरीटकांग
दादिसर्वाभरणभूषितस्यसकललोकातिशायानुसौंदर्यसीम्नोनिरतिशयदयासमुद्रस्यसकलजगद्रक्षणदीक्षितस्यश्रीभगवतोनारा
यणस्यपादादिकेशस्तुतिंदुपासनरूपांसकृत्साठमात्रेणसकलपुरुषार्थसंदोहिनींद्रुपांचाशत्श्लोकात्मिकांकर्तुमारभंते॥ तत्रादौवर्ण्यतेशं
खंभुजाग्रेयस्थितोहरेः॥ नीलशैलशिरोरूढचंद्रबिंबश्रियंवहन्॥ लक्ष्मीभर्तुरिति॥ लक्ष्मीभर्तुः लक्ष्मीनायकस्यकेचुराजः पांचजन्यः भूताहंकारात्मकः नो
स्माकंन्यायात्रक्षतु अरिष्टंनिवर्तयन्दुष्टंत्रापयत्नित्यर्थः॥ पांचजन्यनामाकश्चिदसुरः समुद्रेतिमिरूपेणचरन्नासीत्॥ तदस्त्रिग्रभवात्पांचजन्यः॥ सर्वा
दृशः दितिस्तकुलत्रासनैः असुरवंद्राभयंकरैः स्वैः स्वकीयैर्निध्वानैरितिपाठेसएवार्थः॥ नीरदौघध्वनिपरिभवदैः जलदपंक्तिनिनदतिरस्करणधुरी
णैः अंबरमाकाशंपूरयन्मुखरयन्नित्यर्थः॥ यस्यपांचजन्यस्यस्वरूपंलक्ष्मीभर्तुर्भुजाग्रेभुजशिखरेकृतवसतिकृतावसतिरथस्थानंयेननूत्कृतवस
तिमिसिनंधवलंनीलाद्रेरंजनगिरेस्तंगशृंगस्थितंउन्नतशिखरारूढंरजनीनाथबिंबमिवयामिनीरमणमंडलमिवविभातिविशेषणद्वयेन॥ अत्र
शंखादिविशिष्टत्वेनैवभगवदवयवानामुपासनीयत्वात्पादादिकेशस्तोत्रादिवर्णनस्याप्युपयोगोस्तीतिद्रष्टव्यं॥१॥ श्लो०॥ आदुर्यस्यस्वरूपंक्ष
णमुखमखिलंसूर्यः कालमेतंध्वांतस्थैकांतमंतंयदपिचपरमंसर्वधाम्नांचधाम॥ चक्रंतच्चक्रपाणेरितिजननुगलद्रक्तधाराक्त ——धारंशस्त्र

नोविश्वबंद्यंविनरतुविपुलंशर्मघर्मांशुशोभं॥२॥टीका॥गणेतिकालचक्रंयस्यतेजस्तानंतमोपहं॥असुरास्रग्विलिप्तंतद्यांगंचवर्ण्यतेहरेः॥आदु
रिति॥चक्रपाणेःपाणौचक्रंयस्यसचक्रपाणिः तस्यचक्रंरथांगंमनस्तल्लमयंस्मरदर्शनारब्धनः विपुलंबकुलंशर्मसुखंविनरतुददातु यस्यचक्र
स्यस्वरूपंक्षणमुखंक्षणोमुखंआदियस्यतं त्रिंशत्कलात्मकःक्षणः अष्टादशनिमेषाःकाष्ठात्रिंशत्काष्ठाःकलाः तास्त्रिंशत्क्षणइतिव
चनात् एवंलोकप्रसिद्धतयाव्यवहीयमाणंअखिलंक्षणमुकूर्तपक्षमासादिरूपंकालंसूरयःविदुर्वांसः आदुर्ब्रुवंति भगवतःस्मरदर्शनच
क्रमेवकालचक्ररूपेणप्रथमतःनिशास्त्रविदोवदंतीत्यर्थः ध्वांतस्यांधकारस्यएकांतेनियतंअंतंअंतयतीत्येतंतमोनिवर्तकमितियाव
त् सर्वधाम्नांचधामसर्वेषांतेजसांधामस्थानंप्रकाशकंवा दितिजतनुगलद्रक्तधाराक्तधारं असुरशरीरस्रद्रुधिररूपिनंमुखं
शश्वत् असकृद्विश्ववंद्यंसमस्तजनसेव्यं घर्मांशुशोभंघर्मांशोस्निग्धकिरणस्यशोभेवशोभायस्यतत्तथा उक्तैर्विशेषणैःहेसूर्य
तुल्यमित्यर्थः॥२॥श्लोक॥अव्यान्निर्घातघोरोहरिभुजपवनाधूतनाशाध्वांतमूर्तेरस्मान्निस्संशरनेत्रत्रिदशानुतिवचः साधुकोरेःकृतारः॥
सर्वंसंहर्तुमिच्छोरपिकुलभयनंस्मारविस्मारनादः संयत्कल्पांतसिंधोश्चारसलिलघटावार्मुचः कार्मुकस्य॥३॥टीका॥युत्पत्तिलयपाथोदधीशंगो
घजलवर्षिणःशार्ङ्गस्यवर्ण्यतेनारोहरेरत्राशनेःसमः॥अव्यादिति॥भगवतः कार्मुकस्यधनुषः इंद्रियाहंकारात्मकस्यशार्ङ्गस्यस्मारविस्मा
रनादः प्रच्छटंकारध्वनिः निर्घातघोरः अशनिकठोरः अव्याद्रक्षतुहरिभुजपवनादर्शनाधूतमूर्तेः उपासकानामज्ञाननत्कार्यंशत्रु
सैन्यंचहरतीतिहरिः तस्यनारायणस्यभुजपवनामर्शनेनभुजवेगजनितवायुसंपर्केण आधूताशब्दितामूर्तिर्यस्यतत्तथा सर्वमि
कुलभुवनंसमस्तशत्रुवंशरूपंलोकंसंहर्तुमिच्छोर्विहर्तुकामस्यविस्मरनेत्रत्रिदशानुतिवचः साधुकोरः विकसिननयनदेव
वर्गस्तुतिपाठप्रशंसावचनैः सुन्दरः असुच्छेदारः संयत्तयुत्पत्तेर्देवकस्यांतःसिंधुः प्रलयकालसमुद्रः तस्मिन्नूशारसलि
लघटायाः वाणजलसमूहस्यवार्मुचः मेघरूपस्येत्यर्थः॥३॥श्लोक॥जीमूतश्यामभासामुकुरपिभगवद्बाहुनामोहयंतीं
युध्येधूधूयमानासगितिततडिदिवालक्ष्यतेयस्यमूर्तिः॥सोसिस्रासाकुलाक्षत्रिदशरिपुवपुः शोणितास्वादतृप्तो
नंदायभूयान्मधुमथनमनोनंदकोनंदकोनः॥४॥टीका॥मेघस्थिततडिद्रूपचोरोभगवतः करे॥स्फुरन्नसुरसंहारीनंदकोनंदयं
तेधुना॥जीमूतेति॥नंदकः नंदकोनामासिः खड्गः विद्यामयः सोस्माकंनित्यानंदायनित्यानंदोमोक्षः तस्मैभूयात्मोक्षप्रदोभव

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

ङस्तवेनहरिवाहनं॥ यइति॥ रूपर्णगरुडंवेदे यः विश्वप्राणभृत्: विश्वस्यजगत: प्राणसदृश: तत्रहेतु: हरेस्तनु:श्रीनारायणस्वरू
पभूत: अपिच किंच हरेर्यानकेतुस्वरूप: वाहनरूपोध्वजरूपश्च यानेरथंकेतुस्वरूपइतिवा यंसंचिंत्येवयत्स्मरणमात्रेणैव उरग
वधूवर्गगर्भा: स्वयंपतंतिस्रवंति चंचच्चंडोरुतुंडच्युटितफणिवसारक्तपंकोकितास्यं चंचलोग्रबृहत्तुंडग्रेणगरुंडितानांपन्नगानांवपा
रुधिरजंबालेन अनुलिप्तंमुरवंयस्यसतथा तन्मेदस्कवसावपेत्यमर: छंदोमयंवेदरूपं गरुडोभगवान्स्तोत्ररूपोमच्छंदोमय:
प्रभुरितिभगवद्वचनात् स्वगपतिंपक्षिराजंस्वर्णवर्णकनकप्रभं अमलंनिर्मलं॥ ६॥श्लोक:॥विष्णोर्विश्वेश्वरस्यप्रवरशयनकृत्
सर्वलोकैकधर्त्रीसोनंत: सर्वभूत: पृथुविमलयशा: सर्ववेदेश्ववेद्य:॥पातादिश्वस्यशश्वत्सकलसुरारिध्वंसन: पापहंतासर्वज्ञ: सर्व
साक्षीसकलविषभयात्पातुभोगीश्वरोन:॥ ७॥टीका॥मंचंभगवतोनित्यमागमोनोपपादिनं॥स्तुवंस्यनेनमाचार्योविश्वत्राणैकदीक्षितं॥
विष्णोरिति॥अनंत: शेष:सकलविषभयात्पातुरक्षतु विष्णोर्व्यापनशीलस्यपरमात्मन: अनंतैर्हिश्वनत्सर्वव्यापनारायणस्तितइ
तिश्रुते: व्याघातुरोदसीपार्थकोरिभ्यधिकास्तिना क्रमणाच्चाप्यहंपार्थविष्णुरित्यभिधीयतइतिभारतवचनाच्च तस्यविश्वेश्वरस्य
सकलजगन्नियंतु:परमेश्वरस्यप्रवरशयनकृत् स्वभोगेनोत्कृष्टमंचकृत् सर्वलोकैकधर्त्रीसमस्तजगतांमुख्यधारक: मूर्ध्नी
सहस्रेणजगद्धारयन्स्वयोगमाहात्म्येनविष्णोर्मंचनांभजति चित्रीयमाणव्यापार:सर्वभूत: महाविष्णवभिन्नत्वात्सर्वाकार:
पृथुविमलयशा: विशालनिर्मलकीर्ति: जगद्धारणादिकर्तृत्वेनसर्वत्रसर्वै:स्तूयमानइत्यर्थ: अपिचसर्ववेदेश्ववेद्य: विष्ण्व
भिन्नत्वादेवसकलगमैर्बोधनीय: वेदेश्वसर्वैरहमेववेद्य: सर्ववेदायत्पदमामनंति॥वेदरामायणेचैवभारतेभरतर्षभ॥आ
दौमध्येतथाचांतेविष्णु:सर्वत्रगीयतेइत्यादिश्रुतिस्मृतिनेभ्य: तथैवविश्वस्यपातासमस्तजगतोरक्षिता नकेवलंलोकधारणादिनादुष्ट
निबर्हणेनापित्याह शश्वत्सकलसुरारिध्वंसनइतिनित्यंलेलोकरक्षार्थंसोमित्रिबलरूपेणावतीर्य:सन् सर्वराक्षासासुरादिसंहारे
णात्रस्तनइत्यर्थ: पापहंताउपासकानांपापनिवर्तक: सर्वज्ञ: परमेश्वराभिन्नत्वात्सर्वंजानातीतिसर्वज्ञ: ससर्वविदित्यादिश्रुते: स

र्वविषयज्ञानकर्तृत्वेनविकारप्रसक्तावाहसर्वसाक्षीति निर्विकारतयासर्वंसाक्षादीक्षितइतिनयाचेतन्योदासीन्याभ्यांलोकेसाक्षि
शब्दस्यनिर्विकारद्रष्टरिदर्शनात् मांविध्यनंतत्वंपार्थकृष्णोजिष्णुर्हरिंशिवंब्रह्माणंभास्करंशेषंसर्वव्यापिनमीश्वरंइत्यादौभा
रतादौशेषस्यविष्णुरूपमवगंतव्यं॥७॥श्लोक:॥वाग्भूगोर्यादिभेदैर्विदुरिहमुनयोयांयदीयैश्चपुंसांकारुण्यार्द्रै: कटाक्षै: सकृ
दपिपतितै: संपद: स्यु: समग्रा:॥कुंदेंदुस्वच्छमंदस्मितमधुरमुखांभोरुहांकंदरागींवंदेवंद्यामशेषैरपिसुरभिदुरोमंदिरामिंदिरा
नं॥८॥ टीका॥सरस्वतीमहीगोरीरूपास्वछंदचिन्मयी॥सर्वत्रार्थ्यकटाक्षश्रीःश्रीपत्नीस्मिन्निगद्यते॥वागिति॥ इंदिरांश्रियं
वंदेनमामियांमुनय: वाग्भूगोर्यादिभेदै:सरस्वतीभूमिपार्वत्यादिप्रकारै: विदुर्जानंति पुंसांपुरुषाणांयदीयै: यस्या: संबंधिभि:
कारुण्यार्द्रै:दयारूधाक्लिन्नै: कटाक्षै:अपांगदर्शनै: सकृदपिपतितै: एकदापिपतद्भि:समग्रा: पुष्कला: संपद: धनयशस्सेत्रा
दय: स्युर्भवंति कुंदेंदुस्वछमंदस्मितमधुरमुखांभोरुहां कुंदेंदुवत्स्वछंधवलंयन्मंदस्मितंतेनसुंदरंवदनकमलंयस्या:
तांसुंदरागीं अभिरूपावयवां अशेषैसमस्तैरपिसुरासुरादिभि: भगवच्छंदचित्तछक्तिरूपयातेअभिवंदनीयांसुरभिदु
रोमंदिरांसुरभिदुरोमुरारे: उरोवक्षस्थलमेवमंदिरंगृहंयस्यास्तां अमृतमथनसमयेसर्वान्विहायसर्वोत्पन्नाश्रीर्भगवंतंस
कलगुणोपेतंस्वयमुपसृत्यतदुरस्तटमधिरूढवतीतिपुराणेषुप्रसिद्धंश्रीभगवतोवासुदेवस्यचिच्छक्त्यात्मिकाया:भगव
त्या: लक्ष्म्या: महिमाकोमारिषुप्रपंचनिरूपित: तत्रैवद्रष्टव्य:॥९॥श्लोक:॥यासूतेसत्वजालंसकलमपिसदासन्निधानेनपुं
सोधत्तेयासत्वयोगाच्चरमचरमिदंभूतयेभूतजातं॥धात्रीरुद्रात्रीजनित्रीप्रकृतिमयीकृतिंविश्वशक्तिंविधात्रींविष्णोर्विश्वा
त्मनस्तांविपुलगुणगणांप्राणनाथांप्रणौमि॥९॥टीका॥जनयित्रीसमस्तानांजंतूनांहरिसन्निधे:॥महीमहीयसोविष्णोर्वल्ल
भाचर्ण्यतेधुना॥ तथेति॥विश्वात्मन: विश्वमूर्ते: विष्णो: प्राणनाथांवल्लभांधात्रींभूमिदेवींप्रणौमिप्रकर्षेणस्तौमि भगव
तोविश्वात्मत्वंच पुरुषएवेदंसर्वं विश्वंनारायणंदेवं अएवसंक्षेपमिमंशृणुध्वं नारायण:सर्वमिदंपुराणै: ससर्गकालेचकरो
तिविश्वं संहारकालेचनरत्तिभूयइत्यादिश्रुतिस्मृतिसहस्रेभ्य: अवगंतव्यं धात्रीत्रीसत्वजालंजंतुसमूहंजरायुजांडजस्वेदजोद्भी

जरूपंचतुर्विधभूतयामंसूतेजनयति॥ सदासर्वदापुंसः पुरुषस्यनारायणस्यसंनिधानात्सान्निध्यमात्रेणसकलमपिसमस्त
मपिसत्वयोगात्सत्वगुणसंबंधात् चरमचरं जगमस्थावरंचइदंपूर्वोक्तंभूतजातंप्राणिवर्गभूतयेपरंपरयाभिवृत्यर्थंधत्तेधारयति
एवंचरुछात्रीस्थानशीलांभगवत्कल्पितमर्यादानुलंघ्यनिवासिनी॥ जनित्रींजनयित्रीं॥अविकृतिंविकाररहितांमूलप्रकृतिं अ
तएवविश्वशक्तिंविश्वाः सर्वीः शक्तयोयस्यास्तांविधात्रींसृष्टस्यप्राणिजातस्यान्नादिसंपादनद्वारापोषयंतीं एतच्चस
त्वंरजस्तमः संबंधात् अस्याभवतीत्याह विपुलगुणमयींविस्तृतगुणरूपंगुणत्रयनिर्मुक्तस्यकस्याप्यभावात्कार्यस्येव
मभिधानंतदाहभगवान्ननदास्तेदृष्टिर्व्यांवादिदेवेषुचापुनः सत्वंप्रकृतिर्जैर्मुक्तयदेभिः स्यान्त्रिभिर्गुणैरिति॥ ९॥श्लोकः
येभ्योसूयद्भिरुच्चैः सपदिपदमुरुस्रज्यतेदैत्यवर्गैर्येभ्योधर्तुंचमूर्ध्नास्पृहयतिसततंसर्वगीर्वाणवर्गः॥नित्यंनिर्मूलयेयुर्नि
चिततरममीभक्तिनिघ्नात्मनांनः पद्माक्षस्याघ्रिपद्मद्वयतलनिलयाः पांसवः पापपंकं॥१०॥टीका॥असूयद्भिरसुरैर्यैर्णापदभं
ङ्गविधायिनी॥ पादधूलिःस्मरस्याध्याहरेरत्राभिनंद्यते॥येभ्यइति॥पद्माक्षस्यपुंडरीकाक्षस्य अंघ्रिपद्मद्वयतलनिलयाः चर
णकमलयुगलाभ्यंतरवसतयः पांसवोधूलयः भक्तिनिघ्नात्मनांभजनपरमनसांनः अस्माकंनिचिततरंनितरांलग्नं
अत्यंतरूढमित्यर्थः पापपंकंदुष्कृतकर्ममंनिमूलयेयुः निनरांशोषयेयुः समूलकाषंकषंत्वित्यर्थः येभ्योअसूयद्भिः असू
यांकुर्वद्भिः दैत्यवर्गैः असुरवंशैः सपदिशीघ्रंऊरूसहउच्चैः पदंउन्नतंपदंत्यज्यतेहीयते सर्वगीर्वाणवर्गः सकलदेवस
मूहः मूर्ध्नाउत्तमांगेनधर्तुंधारयितुंस्पृहयतिसततंचिरतं॥१०॥श्लोकः॥रेरवालेरवाभिवंद्याश्चरणतलगताश्चक्रमत्
स्यादिरूपाः स्निग्धाः सांद्राः श्लक्ष्णाः सूक्ष्मीदभ्राः सुजाताः मनोज्ञाः मृदुललिततरक्षौमसूत्रायमाणाः॥ मृदुलमनोहरदु
कूलतंतुसदृशाः भ्रमरभरजुषाषट्पदसमूहसेवितेनषट्पदयुक्तेनेतिवा कमलेनमृदुना अब्धिजायाः क्षीरसमु
द्रकन्यायाः लक्ष्म्याः कंम्रेणकांतेन किसलयेमृदुनापल्लवतुल्येनपाणिनाहस्तेन आम्रेड्यमाणाः पौनःपुन्येन परा
मृश्यमाणाः॥११॥श्लोकः॥यस्मादाक्रामतोह्यंगरुडमणिशिलाकेनुदंडायमानादाश्योनंतीवभासेसुरसरिदमलावेजयं
तीवकांता॥भूमिष्ठायस्तथान्योभुवनगृहभरस्तंभशोभादधानःपातामंतोपयोजोरललितंलोपंकजाक्षस्यपादौ॥१२॥
टीका॥स्तूयंतेचरणौविष्णोर्ययोरेकोवियत्पथिं॥पताकामध्रुनेलोकगृहस्तूणायतेपरः॥यस्मादिति॥पंकजाक्षस्य
हरेः पयोजोदरललितनलोअरविंदोतरकंदरांतःप्रदेशोएतौपादौनः पातांरक्षतांइतियोजना॥ यस्मात्व्यचरणान्
द्यां अंतरिक्षं आक्रामतः व्याप्नुवतः गरुडमणिशिलाकेनुदंडायमानान् गारुत्मतमरकतरत्नकृतध्वजदंडसदृशा
न् आश्योनंतीआसमंतात्स्वयंती अमलाअतिस्वच्छासुरसरिद्गंगाकांतामनोज्ञांवेजयंतीवभासे पताकेवरराज तथा
न्यः पादः भूमिष्ठः भुविवर्तमानः भुवनगृहबृहत्स्तंभशोभां त्रिभुवनभवनमहास्तूणालीलांदधानः दधौ बिभ्र
त् नाभेर्नोनः पातामितिसंबंधः॥ १२॥श्लोकः॥ आक्रामद्भ्यांत्रिलोकीमसुरसुरपतीननक्षणादेवनीतोयाभ्यांवेरो
चनींद्रोयुगपदपिविपत्संपदोरेकधाम॥नाभ्यांताभ्यांदराभ्यांमुहुरहमजितस्योचिताभ्यांकृताभ्यांप्राज्येश्वर्यप्रदाभ्यां
प्रणतिमुपगतः पादपंकेरुहाभ्यां॥१३॥टीका॥ दित्सरित्सात्मजेंद्रापसंपदानधुरंधरौ॥पादौशंकरयोर्गीर्द्वैः स्तूयंतेकदभ
द्विषः॥आक्रामद्भ्यामिति॥अजितस्यविष्णोः पादपंकेरुहाभ्यांचरणारविंदाभ्यांप्रणतिनमस्कारमुपगतोस्मिकृतवा
नस्मीतियावत्त्रिलोकीलोकत्रयं आक्रामद्भ्यांव्याप्नुवद्भ्यां असुरसरपती असुराणांसुराणांचेश्वरौ वैरोचनींद्रो च

शेषनिर्वलिः इंद्रः प्रमिथः मघवान् युगपदेककाले विपत्संपदः विपत्तिसंपन्नाः एकधाममुख्यरूपानेत्राभ्यांनीलोत्पलाभिनो स
त्क्षणादेव आक्रामणक्षणयवताभ्यां ताम्रोदराभ्यां अरुणतलाभ्यां अंचिताभ्यांपूजिताभ्यांप्राज्यंप्रचुरं॥१३॥श्लोकः॥सभ्योव
र्णश्चतुर्थश्चरमसदभूदादिसर्गेप्रजानांसाहस्रीचापिसंख्याप्रकटमभिहितासर्ववेदेषुयेषां॥व्याप्ताविश्वंभरायेरनिविननन
नोर्विश्वमूर्तेर्विराजोविष्णुस्तेभ्योमहद्भ्यः सननमपिनमोस्वंघ्रिपंकेरुहेभ्यः॥१४॥टीका॥विराण्मूर्तेःश्रियः पत्युः दासोनुकर
योगिभिः॥सहस्रसंख्यावर्णेनेतुर्यवर्णेकयोनयः॥येभ्यइति॥विराजः विराट्रूपस्यविश्वमूर्तेः विश्वात्मकस्यविष्णोरिति विन
ननतोः अत्यंतविस्तृतमूर्तेः महद्भ्यः पृथुलेभ्यः अंघ्रिपंकेरुहेभ्यः चरणकमलेभ्यः चरमतश्चरमेभ्यः जघन्येभ्यः इतरस
र्वांगापेक्षया निकृष्टेभ्यः चतुर्थोवर्णः शूद्रप्रजानां प्राणिनां आदिसर्गेप्रथमसृष्टौउदभूतउद्भूतः पद्भ्योऽद्रो अजायतेतिश्रु
तिः साहस्रीचापिसंख्यासहस्रपरिमाणासंख्यासर्ववेदेषुसहस्रशीर्षापुरुषः सहस्राक्षः सहस्रपादित्यादिश्रुतकटस्फुट
अभिहिताउक्ताः येविश्वंभराभूमिः व्याप्ता आवृतानेभ्योनमः नमस्कारोस्तु॥१४॥श्लोकः॥विष्णोः पादद्वयाग्रेविमलनखम
णिभ्राजिताराजतयाराजीवस्येवस्म्याहिमजलकणिकालंकृतायादलालिः॥अस्माकंविस्मयार्हाण्यखिलमुनिजनप्रार्थनीया
निसेयंदद्यादाद्यानवद्यानतिरनिरुचिरामंगलान्यंगुलीनां॥१५॥टीका॥हेमविभूषपरिष्कारपाथोजलदशोभिनी॥स्तूयतें
घ्र्यंगुलिश्रेणिहेरेर्नेरवरभूषिना॥विष्णोरिति॥विष्णोः पादद्वयाग्रेहरेश्चरणद्वयांतेविमलनरवमणिभ्राजिता निर्मलनरव
रूपस्फटिकरत्नराजिनाजीवस्येवस्यपद्मस्येवहिमजलकणिकालंकृतायाहिमजलभूषितायग्रभागादलालिः पत्रपंक्तिः अस्मा
कंविस्मयार्हाणि आश्चर्यकराणि अखिलमुनिजनप्रार्थनीयानिसकलऋषिप्रार्थ्यानि मंगलानि अभ्युदयमोक्षलक्षणानि
सेयमुपासना कालेमनसिसन्निहिता आद्यापुरानंनी अनवद्यानिर्दोषा अंगुलीनांततिः समूहः दद्यात्ददातु॥१५॥
श्लोक॥यस्योदङ्मालायांप्रनिकृतिममराः स्वांभवंत्यानमंतः सेंद्राः सोद्रीकृतेघ्र्यस्त्विपरसरकुलाश्रोकयातंकवंतः॥सा

सद्यः सातिरेकांसकलसरवकरींसंपदंसाधयेन्नचंचच्चार्विंशचक्राचरणनलिनयोचक्रपाणेनरवालिः॥१६॥टीका॥नम्रामरात्मवि
बालिनापास्यूयाविधायिनी॥चक्रपाणेर्नरवश्रेणिश्चारुश्लोपवर्ण्यते॥यस्यामिति॥चक्रपाणेश्चरणनलिनयोः नरवालिः हरेः
पादपद्मयोर्नरवपंक्तिः सद्यः शीघ्रंसातिरेकामाधिक्यसहितासकलसरवकरींसंपदंऐश्वर्यंसाधयेन्ददातु चंचच्चार्विंशच्च
क्रालोलरम्यकिरणकालापा अमलायांनिर्मलायांयस्यांनरवपंक्तौस्वांप्रनिकृतिंस्वप्रतिबिंबंदृष्ट्वाआनमंतः प्रक्ष्मीभवंतः
सेंद्राः इंद्रसहिताः सोद्रिक्तेभ्याः समुत्थासूयाः अपरकुलाश्लोकयातंकुर्वंतः अन्यदेवकुलसुध्यासंतापयंतोभवंति॥१६॥
श्लोकः॥पादांभोजन्मसेवासमवननसुरव्रातभास्वन्किरीटप्रत्युप्तोच्चावचास्मप्रवरकरगणैश्चित्रितंयद्विभाति॥नम्रांगा
नोहरेर्नेहिरिदुपलमहाकूर्मसौंदर्यहारिछायंश्रेयः प्रदायिप्रपदयुगमिदंप्रापयेत्तापमंतत्॥१७॥टीका॥नमत्सुरकिरी
टस्थमणिरोचिः करंभितं॥कमठाकृतिपादाग्रयुगंविष्णोरिहेड्यते॥पादांभोजेति॥हरेरिदंप्रपदयुगंपादाग्रद्वयंपापं
दुरितंअस्यंतंनाशंप्रापयेत्प्रापयतु कीदृशं पादावेवांबुजन्मनीपद्मेयस्याः सेवायांभजनेसमवननानांसुराणांश्रा
नः समूहः तस्यभास्वत्किरीटप्रकाशावनमुकुटप्रत्युप्ताः खचिताः उच्चावचाः नानाविधामणिप्रवराः मणिश्रेष्ठाः ते
षांकरगणैः रश्मिसमूहैः चित्रितंसजातनानारूपंविभातिदीप्यंते नम्रांगानांप्रक्ष्मीभूतावयवानांहरिदुपलमहाकू
र्मसौंदर्यहारिछायं नीलमणिमयमहाकूर्मलावण्यमनोज्ञकांतिः श्रेयः प्रदायिनीश्रेयसदात्रीस्तां॥१७॥श्लोकः॥
श्रीमत्योचारुवृत्तेकरपरिमिलनानंदलब्धेरमायाः सौंदर्याघ्रेर्नीलोपलरचितमहादंडयोः कांतिचोरे॥सूरींद्रैः स्तूयमानेसुरकु
लसरवंदस्तुदितारातिसंघंजंघेनारायणीयेमुकुरपिजयनामस्मदंहोहरंत्यो॥१८॥टीका॥क्रमनासीमशोभेदृसौंदर्योदयमेचकं॥श्री
मद्भिर्भगवज्जंघाद्वियसंप्रकीर्त्यते॥श्रीमत्यादिति॥नारायणसंबंधिन्योजंघेमुकुरपिअस्मदंहः अस्मत्पापहरंत्योसत्योजय
नांसर्वोत्कर्षेणवर्तेतां श्रीमत्योकांतिमत्यो चारुवृत्तेमनोज्ञवर्तुलेरमायाः लक्ष्म्याः करपरिमलमानंदलब्धपाणिसंपर्कज

नितस्करेनरोमांचिते॥सौंदर्योद्वेंद्रनीलोपलरचितमहादंडयोः कांतिचोरे॥लावण्यपूर्णेंद्रनीलमणिनिर्मितदीर्घपृथुलय
ष्टिशोभाहरिण्यो॥सुरैंद्रैः नारदाद्यैः विद्वत्प्रवरैः स्तूयमानेऽद्भुतमानेसुरकुलसखदे देवदेवराजमंदे सूरिनारातिसंघे
ऽतनद्वसुसमूहे॥१८॥श्लोकः॥सम्यग्साह्यंविधातुंसममिवसततंजंघयोः खिन्नयोर्यैभारीभूतोरुदंडद्वयभरणकृतोत्तंभभावंभ
जंते॥चित्तादर्शंनिधातुंमहिनमिवसनांतेसमुद्गायमानेवृत्ताकारेविधानोत्तदिमुदमजिनस्यानिशंजानुनीनः॥१९॥टीका॥
करुभाराक्रमक्लिष्टजंघाकांडप्रियावहा॥दनुसूनुरियोर्जानुयुगलीहोपवर्ण्यते॥सम्यगिति॥अजितस्यविष्णोः जानुनी
नः हृदि अनिशंसदामुदंसंतोषंविधत्तांकुरुतां॥येजानुनीखिन्नयोः क्लेशभाजोः जंघयोः॥भारीभूतोरुदंडद्वयभरण
कृतोत्तंभभावंभाग्भूतस्यकरुदंडद्वयस्यभरणनिमित्तंकृतोनिर्मितः उत्तंभः उपवाहकः नद्भावंनन्नतिंभजेते॥सनत
मविरतं समंसहसम्यग्साह्यंसमीचीनसहायभावंविधातुमिवसतांमहतांचित्तादर्शं चित्तमेवमुकुरः आत्मप्रति
बिंबधारित्वात्॥महिनंपूजितंविधातुमिवरुचायनुमिवसमुद्गायमानेसंपुटायमानेवृत्ताकारेवर्तुलस्वरूपे॥विधा
नामिनिसंबंधः॥१७॥श्लोकः॥देवोभीतिंविधातुःसपरिविदधतौकेटभारब्यंमधुंचाप्यारूढगर्वाधिजल
धियोगादिदेवोजघान॥वृत्तावन्योन्यतुल्योचतुरमुपचयंबिभ्रताब्भ्रनीलंबूरुचारुहरेस्तौमुदमतिशयनीमानसेनो
विधत्तां॥२०॥टीका॥मधुकेटभसंहारसमरंगणसन्निभो॥स्तूयतेश्रीपतेरूरुचारूजलदमेचकौ॥देवइति॥देवनारायण
णः विधातुः ब्रह्मणः भीतिंविदधतौभयंकुर्वाणौ॥केटभाख्यंमधुनामानंचआदिदेवोयोरूर्वोः उपरिआरोप्यरूपा
पयित्वा अधिजलाधिसमुद्रमध्ये॥आरूढगर्वौप्राप्ताहंकारौजघानसंहृतवान् इदंचपुराणेप्रसिद्धं वृत्तौवर्तुलौअ
न्योन्यतुल्यौपरस्परसदृशौ॥चतुरमुपचयंविभ्रतौपदुत्तरवृद्धिभाजौ॥अभ्रनीलोमेघः श्यामोआकाशनीलोचारुम
नोज्ञोऊरुनः मानसेहृदये अतिशयनींमुदं अधिकंसंतोषंविधत्तांकुरुतां॥२०॥श्लोकः॥पीतेनद्योततेयच्चतुरपरिहिते

नांबरेणात्युदारंजातालंकारयोगंजलमिवजलधेर्वाडवाग्निप्रभाभिः॥एतत्पातित्यदाचोजघनमतिघनादेनसोमानसी
यंसातत्तेनैवचेतोविषमवतरपातुपीतांबरस्य॥२१॥टीका॥वडवानलकीलाभिपरीताब्धिजलोपमं॥पिंगवासोजघ
नमाचार्यैर्वर्ण्यतेधुना॥पीतेनेति॥पीतांबरस्यविष्णोः एतज्जघनंअतिघनान् अतिनिबिडान्पातित्यदात्पनिसंपादका
न्एनसःपापात्नः अस्मान्पातुरक्षतु॥सातत्येननैरंतर्येणचेतोविषयंमनोदेशं अवतरदवगाहमानः सन्माननीयं
पूजनीयंयज्जघनचतुरपरिहितेनसम्यगाछादितेनपीतांबरेणवासमा॥अत्युदारंअत्यंतमहज्जातालंकारयोगंसं
पन्नाभरणसंबंधः॥वाडवाग्निप्रभाभिः वडवाग्निमुखाज्ज्वालाभिः जलधेर्जलमिवसमुद्रस्यजलमिवसलिलमिव
द्योततेदीप्यते॥२१॥श्लोकः॥यस्याधाम्नाविधाम्नोजघनकलितयाभ्राजतेंगंयथाब्धेर्मध्यरूढोमंदराद्रिर्भुजगपतिमहाभोगसन्न
द्धमध्यः॥कांचीसाकंचनाभामणिवरनिकरैरुल्लसद्भिः प्रदीप्ताकल्यांकल्याणदात्रींममममतिमनिशंकम्ररूपाकरोतु॥२२॥टीका॥
रत्नानाश्रीपतेरंगंराजयंतीवधामतः॥वासकिंश्लिष्टवार्धिरुन्मंदराभमिहेक्ष्यते॥यस्येति॥त्रिधाम्नः त्रीणिधामानियस्यस
त्रिधामातस्य॥तथाच॥श्रीरंगमाहात्म्ये॥क्षीरोदोमंडलंभानोरसेंदोरुदचनथारवि॥त्रीणिधामानिमेसंतित्रिधामाहमितिस्मृ
तइति॥तस्यविष्णोः कांचनभास्वर्णशोभामणिवरकिरणैः रत्नश्रेष्ठकांतिभिः॥उल्लसद्भिः भास्वरैः दीप्ताग्रकुट्टदीप्तियुक्ता
कल्याणदात्रीमंगलदायिनी॥कम्ररूपांतमूर्तिः साकांचीरत्नानाममममतिंप्रज्ञां अनिशंकल्यांप्रातिरामयांकरोतु जघनक
लितया॥यस्याधाम्नाकटिसूत्रेण अंगंभगवतोवयवः भाजतेदीप्यते॥कथमिव॥ यथाब्धेर्मध्यरूढः समुद्रांतरालवर्तीभु
जगपतिमहाभोगसन्नद्धमध्यः॥वासकिबृहत्कायबद्धमध्यप्रदेशोमंदराद्रिर्यथा॥२२॥श्लोकः॥उन्मद्भंकम्रमुच्चैरुप
रिंतिमुदभूद्यत्रपंत्रैर्विचित्रैः पूर्वैर्गीर्वाणपूज्यंकमलजमधुपस्यास्यदंतरपयोजं॥तस्मिन्नीलाश्मनीलैस्तरलहरुचिज
लैः पूरितेकेलिधुध्यानालीकाक्षस्यनाभीसरसिवसतुनश्चित्तहंसश्चिराय॥२३॥टीका॥विरिंचिकमलावासचित्रना
लीकजन्मभूः॥श्यामकांतिजलानाभिवापीह्यायतेहरेः॥उन्मद्भमिति॥नालीकाक्षस्यकमलनयनस्यनाभीसरसिना

भ्येवसरस्तस्मिन्चित्तहंसः चिरायचिरकालंकेलिबुध्यालीलाबुध्यानः अस्माकंवस्तुचासंकरोतु॥ तत्रनित्यंरमतामित्यु
र्थः॥यत्रनाभिसरसिउन्मत्तंउन्नतं उच्चैरुपचितंउद्दंडतयाप्रवृद्धंविचित्रैः पत्रैः नानाविधैः पलाशैः सहितैः रुपलक्ष्यमा
णंपूर्वैकमलकुलकूटकं॥गीर्वाणपूज्यंदेवजनमाननीयंकमलजमधुपस्यास्परं॥चतुर्मुखषट्पदावलानंतस्यसि
त्थं पयोजपद्मं उदभूदुद्भुतं नीलाश्मनीलैः॥इंद्रनीलमणिश्यामैः॥तरलरुचिजलैः चंचलकांतिजलैः पूरितेभरिते
तस्मिन्॥ २३॥ श्लोकः॥ पातालंयस्यनालंबलयमपिदिशांपलशंकिंनगेंद्रान्विद्वांसः केसरालीर्विदुरिहविपुलांकर्णिकां
स्वर्णशैलां॥ भूयाद्वायत्स्वयंभूमधुकरभवनंभूमयंकामदंनोनालीकंनाभिपद्माकरभवमुरुनन्नागराज्यस्यशेरेः॥२४॥
टीका॥ किंजल्कगिरिभिः पत्रैर्दिग्भिर्नालीरसातलात्॥हरिनाभिसरोजन्मवर्ण्यतेमेरुकर्णिके॥पातालमिति॥नाग
राज्यस्यशेषशयनस्यहरेः विष्णोः नाभिपद्माकरभवनाभिसरः समुत्पन्नंनोलीकंपद्मंगायत्स्वयंभूमधुकरभवनं
वेदमयझंकारपरचतुराननशृंगमंदिरंभूमयंभूमिस्वरूपंनः कामदंभूयात्वांछितप्रदमस्तु॥यस्यनालीकस्यपाता
लंनाल्॥दिशांवलयमपिमंडलमपिपत्रपंक्तिंदलराजिंविद्वांसः नगेंद्रान्केसरालीः किंजल्कराजीः विदुः यस्यस्वर्ण
शैलंमहामेरुंविपुलंविशालांकर्णिकामाहुः तत्कुरु अतिमहत्॥२४॥श्लोकः॥आदौकल्पस्ययस्मात्प्रभवति
चितनंविश्वमेतद्विकल्पैः कल्पांतेयस्यचांतः प्रविशतिसकलंस्थावरंजंगमंच॥अत्यंताचिंत्यमूर्तेश्चिरतरमजित
स्यांतरिक्षस्वरूपंतस्मिन्नस्माकमंतः करणमतिमुदाक्रीडतांतक्रोडभोगे॥२५॥टीका॥ यस्मान्निर्गमयद्विश्वंसर्गाद्य
समयेतथा॥ प्रलयेसंदधद्विष्णोस्तूयतेत्रभुजांतरं॥आदाविति॥अत्यंताचिंत्यमूर्तेः यतोवाचोनिवर्तंतेअप्राप्यमनसा
सहेतिश्रुतेः॥वाङ्मनसागोचरत्वेनचिंतापदमतिक्रांतमूर्तिर्यस्यतस्याजितस्यविष्णोः॥अंत्यंतंवेपुल्यादंतरिक्षस्वरूपे
आकाशसदृशेक्रोडभोगेभुजांतरेनः अंतः करणंबुद्धिः अतिमुदाअत्यंतसंतोषेणसहचिंतरंबहुकालंक्रीडतांदृढ़

MEMORIAL

रतु यस्माल्कल्पास्यादौसर्गाद्यसमयेअतिविततंअत्यंतविस्तृतंस्थावरंजंगमंचएतत्परिदृश्यमानंविश्वंसमस्तंविकल्पैः
नानाशक्तिभिर्विचनाविशेषैः सहप्रभवतिप्रादुर्भवति तथाकल्पांतेप्रलयकालेयस्यांतः प्रविशतिसूक्ष्मरूपेणसं
क्षिप्तंलीयतेचतस्मिन्॥२५॥श्लोकः॥कांत्यंभः परपूर्णेलसदसितवलीभंगभास्वत्तरंगंगंभीराकारनाभीचतुर
त्तरमहावर्तशोभिन्युदारे॥क्रीडत्यानत्यहेमोदरनहनमहाबाडवाग्निश्रमार्ध्वकामंदामोदरीयोदरसलिलनिधौ
चित्तमत्स्यश्चिरंतः॥२६॥टीका॥ हेमपट्टचन्हिनाभिशोभिविष्णोरिहोदरं॥ वर्ण्यतेरुचिभावीच्यावर्तदीप्तांबु
धिप्रभं॥ कांत्यंभइति॥ दामोदरीयोदरसलिलनिधौदामोदरीयमुदरमेवसलिलनिधिः समुद्रः तस्मिन्नश्चि
त्तमत्स्यः चित्तमेवमत्स्यः क्रीडतुकेलिंकरोतु आनत्यहेमोदरनहनंस्वर्णमयोदरबंधनमेवमहाबाडवाग्निः
तत्प्रमार्ध्वेनत्यकाशस्मृत्यै कांत्यंभः परपूर्णेदीप्तिजलप्रवाहपूरिते लसदसितवलीभंगभास्वत्तरंगंभास
मानचलिभगएवभास्वत्तरंगः दीप्यमानोर्मिः तद्युक्ते गभीराकारनाभीचत्तुरत्तरमहावर्तशोभिनिगंभीराका
राअगाधमूर्तिः नाभ्येवचतुरत्तरमहावर्तः पृथुपटुतरजलभ्रमः तेनशोभमाने अत्युदरे अंत्यंतमहति॥२६॥
श्लोकः॥नाभीनालीकमूलादधिकपरिमलोन्मोहितानामनालीनामालानीलेलयांतिरुचिमतिवक्त्रपद्मो
न्मुखीया॥ रम्यासारोमराजिर्महिरुचिकरीमध्यभागस्यविष्णोश्चित्तरुक्षामाविरंसीच्चिरतमुचितांसाध
यंतीश्रियंनः॥२७॥टीका॥आयांतीवमुखांभोजंनाभीनालीकमूलतः॥शृंगमालावलीरोमाहरेरोमावली
त्रोपवर्ण्यते॥नाभीति॥विष्णोर्मध्यभागस्यमध्यदेशस्यमहितरुचिकरीश्रेष्ठास्तकांतिसंपादिनी रम्या
त्तुद्यारोमराजिः रोमावलिः नः अस्माकं चिरत्तरं उचितांतत्तत्समयोपयोगिनींश्रियंसाधयंतिसंपादयं
तीचित्तरुक्षामनसिस्थितामाविरंसीत्माविरमत् नाभीनालीकमूलात्योनीगच्छंतीवक्त्रपद्मोन्मुखीव

दनारविंदाभिमुखी॥ अधिकपरिमलोन्मोहितानांप्रचुरतरामोदसंजातमोहानां अलीनांभ्रमराणांमाला नीलेव नीलामालेवरुचिमतीप्रशस्तकांतियुक्तास्फुरतिदीप्यते॥ २७॥ टीका॥ संस्तीर्णकौस्तुभांशुप्रसरकिसलयेर्मुग्धमुक्ताफलाढ्यं॥श्रीवत्सोल्लासिफुल्लत्प्रविपिनवनमालांशुराजद्भुजांतं॥ वक्षश्रीवक्षकांतंमधुकरनिकरश्यामलंशार्ङ्गपाणेः संसारध्वश्रमार्तैरुपवनमिवयत्सेवितंतत्पदद्यं॥ २८॥ टीका॥ वक्षः कौस्तुभलक्ष्मिवत्वनमालिमधुद्विषः॥ हरिसंस्तुतिपथ्यार्थापवनंस्तूयतेधुना॥ संस्तीर्णमिति॥ शार्ङ्गपाणेर्वक्षस्थलं अहंप्रपद्येप्रपन्नोस्मि॥ कीदृशं॥ संसाराध्वश्रमार्तैः संसारजनितपरिश्रमणजनितपीडैः उपवनमिवआरामइवकौस्तुभांशुप्रसरकिसलयैः॥ कौस्तुभरत्नकिरणविसर्पणपल्लवैः संस्तीर्णं सम्यगाचितंमुग्धमुक्ताफलाढ्यंसुंदरमौक्तिकर्माणभूषितं॥ श्रीवत्सोल्लासिश्रीवत्सोरोमावर्तविशेषः तेन शोभमानं फुल्लत्प्रविपिनवनमालांशुराजद्भुजांतं॥ विकसिताभिनवपुष्पमालाप्रभाविलासद्भुजां तं॥ श्रियः आधारवृक्षवत्कांतंमनोज्ञं॥ मधुकरनिकरश्यामलं भ्रमरजालमेचकं॥ पक्षांत रे॥ कौस्तुभवच्छोभमानं॥ पल्लवयुतं॥ मुक्ताफलैः त्यक्तफलाभावैः॥ विद्यमानफ ॥७॥
लैराढ्यं॥ वनमाला काननपंक्तिः॥ भुजाः विटपाः श्रीवृक्षः विश्ववृक्षः इत्यन्वयः॥२८॥

श्रीः॥ श्लोक॥ कांतंवक्षोनितांतंविदधदिवगलत्कालिमाकालशत्रोरिंदोर्बिंबंयथांकोमधुपइवतरोर्मंजरीं राजतेयः॥श्रीमान्नित्यंविधेयाद्विरलमिलितःकौस्तुभःश्रीप्रतानैःश्रीवत्सःश्रीपतेःसाश्रियइवदयितोवक्षऊ र्ध्वैःश्रियंनः॥२९॥टीका॥विराजयन्हरेर्वक्षोलक्ष्मीसूनुरिवोज्वलः॥ कौस्तुभश्रीकृताश्लेषःश्रीवत्सःस्तूयतेधुना ॥कांतमिति॥श्रीपतेःश्रीवत्सःश्रीवत्सलक्षणंविष्णुपुराणेदर्शितं प्रदक्षिणावर्तीविचित्ररोमश्रीवत्ससद्दिंव बिभ्राणतांगामिति प्रहृत्यात्मकःऊर्ध्वैःश्रियंउन्नतांलक्ष्मींनःविधेयात्विदधातु कौस्तुभश्रीप्रतानैःकौस्तु भरत्नप्रभारोहैःअविरलमिलितःअतिनिबिडतयासंबद्धःश्रियःमहालक्ष्म्याःदयितःवल्लभःवत्सइवसूनु रिवश्रीमान्प्रशस्तकांतिभाकूनित्यंसदायोभगवद्वक्षस्थलंनितांतंकांतंविदधत्राजते पूर्वमेवमनोज्ञंसं अतिशयेनमनोज्ञंविदधत्कुर्वन्कालशत्रोर्गलशिवस्थंकंठंकालिमेवकालकूटप्रयुक्तंनेत्यमिवइंदोर्बिंबंयथा इवचंद्रमंडलंलांछनमिवतरोर्मंजरींवृक्षस्यकुसुमगुच्छंमधुपइवभ्रमरइव॥२९॥ श्लोक॥ संभूयांभोधिम ध्यात्सपदिसहजायाःश्रियासन्निधत्तेनीलेनारायणोरस्थलगगनतलेहारतारोपसेव्ये॥आशाःसर्वाःप्रकाशा विदधदपिदधच्चात्मभासान्यतेजोराशेर्यस्याश्चर्यस्याकरोनोद्युमणिरिवमणिः कौस्तुभःसोस्तुभूत्यै॥३०॥टीका॥ सा कंलक्ष्म्याहरेहारभाजिवक्षसिसंस्थितः॥अन्यतेजोःसहार्काभःकौस्तुभोस्मिन्निगद्यते॥संभूयेति॥कौस्तुभोम णिःपुरुषात्मकःनःभूत्यैऐश्वर्यायभूयात्अस्तु कीदृशः अंभोधिमध्यात्समुद्रोनरात्संभूयजनित्वा सहजयासहभुवाश्रियालक्ष्म्यासहभागिनीस्नेहातनीलेश्यामलेहारतारोपसेव्ये मुक्तावलीरूपनक्षत्राश्रिते नारायणोरःस्थलगगनतलेहरिवक्षस्स्थलाकाशदेशेसान्निध्नेनियमेनवर्तते पक्षेसजयाश्रियानैसर्गिक्याकौ स्तुभाहरतुल्यनक्षत्रसेविनेनारायणोरःस्थलतुल्याकाशेसर्वाआशाःसमस्ताःदिशःप्रकाशाःप्रकाशमानाःकुर्वन् आत्मभासानिजप्रकाशेनअन्यतेजोसिन्चंद्रनशशधरादिज्योतींषिअपिदधत् आच्छादयन् आश्चर्यस्याकारःअ द्भुतस्यनिधिःद्युमणिःसूर्यइव॥३०॥श्लोक॥ यावायावानुकूल्यात्सरितिमणिरुचाभासमानासमानासाकंसाकंप

मंसेवसतिविदधतीवासुभद्रंसुभद्रं॥सारंसारंगसंघैर्मुखरितकुसुमामोचकांतिकांतामालामालालितास्मा
न्नविरमतुसुखेभोजयंतीजयंती॥३१॥टीका॥अनुकूलचलद्बाहुचलितांसेहरेःस्थिता॥धु युंजन्पदांघ्रिप्रसवा
वनमालात्रवर्ण्यते॥यावायाविति॥मालालितालक्ष्मीर्देव्यभिनंदितासारंगसंघैःभृंगसमूहैर्मुखरितकुसुमाश्र
ितप्रसूनोमेचकांताश्यामलाग्राअतिकांताअत्यंतमनोज्ञामयंति सर्वोत्कर्षेणवर्तमानासामालाअस्मान
सुखेयोजयंतीसंघट्टयंतीमाविरमतुसर्वदासुखंजनयत्वित्यर्थः यामालावायोरानुकूल्यात्सरनिआनुगु
ण्येनवातिसतिमणिरुचाकोस्तुभादिकांत्यासहभासमानादीप्यमानासाकं ईषत्कंपेनसहितंयथातथाअं
सेवसतिसंधत्ते असमानासर्वोत्तरा असुभद्रं अमंगलं दुरितवंतंसुभद्रकल्याणयुक्तंविदधतीकुर्वतीवसा
अरंशीघ्रं॥३३॥श्लोक॥हारस्योहप्रभाभिःप्रतिनवनमालांशुभिःप्रांशुरूपैःश्रीभिश्चांगदानांशबलितरु
चियल्लिकाभाभिश्चभाति॥बाहुल्येनैवबध्नांजलिपुटमजितस्याभियाचामहेतद्बंधार्तिबाधतान्नोबहुविह
तिकरींबंधुरंबाहुमूलं॥३२॥टीका॥शृंगीकनककेयूरमाल्यहारंप्रभोज्वलं॥बाह्योर्मूलंहरेःश्रीमदाचार्यैरुपव
र्ण्यते॥हारस्येति॥अजितस्यविष्णोःबंधुरंसुंदरंबाहुमूलंनःबहुविहतिकरींअनेकश्रेयःप्रतिबंधकारिणीं
बंधार्तिसंसारबंधजनितपीडांबाधतांनिवर्तयतुं हारस्योरुप्रभाभिःमुक्तावलेरधिककांतिभिःप्रतिनवन
मालांशुभिःनूतनपुष्पमालाप्रकाशैःप्रांशुरूपैरुदग्ररूपैःअंगदानांकेयूराणांचश्रीभिःशोभाभिःनिकभाभि
श्चयछबलितरुचिभातिप्रकाशतेबध्नांजलिपुटंयथाभवतितथाबाहुल्येनैवबहुवारंअभियाचामहेआ
भिमुख्येनप्रार्थयामहे॥३२॥श्लोक॥विश्वामित्रैकदीक्षास्तदनुगुणगणक्षत्रनिर्माणदक्षाःकर्तारोदुर्निरूपाःसु
टगुरुयशसांकर्मणामद्भुतानां॥शार्ङ्गंबाणंकृपाणंफलकमरिगदेपद्मशंखौसहस्रंबिभ्राणाःशस्त्रजालंममद्
धतुहरेर्बाहवोमोहहानिम्॥३३॥टीका॥लोकरक्षाधुरीणानामपादानोपशोभिनां॥बाहूनामस्त्रदीप्तानांव

वर्णनंक्रियतेहरेः॥विश्वेति॥हरेर्बाहवःममोहस्यअविद्याकार्यजालस्यहानिंनाशंविदधतुकीदृशाः
विश्वत्राणेकदीक्षाःजगद्रक्षणैकहृतसंकल्पाःतदनुगुणगणक्षत्रनिर्माणदक्षाःविश्वरक्षानुरूपायेगुणाः
शौर्यधैर्यधार्मिकत्वादयःतेषांतेषांक्षत्राणांक्षत्रियाणांनिर्माणउत्पादनेदक्षाःसमर्थाःदुर्निरूपाःअप्र
मेयबलाःस्फुटगुरुयशसांव्यक्तपृथुकीर्तीनांअद्भुतानानाश्चर्याणांमधुकैटभादिसंहारादीनांकर्तारो
विधातारःशार्ङ्गधनुःबाणंशरं कृपाणंखड्गं फलकंचर्म अरिगदेचक्रंकौमोदकीं पद्मशंखौनलिनंपांच
जन्यंचशस्त्रजालंशस्त्रसमूहंचबिभ्राणाः साहस्रंबाहवइतिसंबंधः॥३३॥श्लोक॥कंठाश्लेषेरमायाःक
वलयपदैर्मुद्रितेभद्ररूपेवैकुंठीयेत्रकंठेवसतुममतिःकुंठभावंविहाय कंगाकल्पोद्भूतैर्यःकनकमय
लसत्कुंडलोल्लेखिरुदारैरुद्योतैःकौस्तुभस्याप्युरुभिरुपचिताश्चित्रवर्णोविभाति॥३४॥टीका॥आश्लिष्यदधि
तनयाचलद्बलयचिह्नं॥किमाराभरणोद्योतैर्गीर्वाभिस्मिन्वर्ण्यतेहरेः॥कंठेति॥वैकुंठीयेकंठेममतिःकुं
ठभावंमांद्यंविहायत्यक्त्वावसतुअलसतांविहायतत्रैवरमतामित्यर्थः कंगाकल्पोद्भूतैःकंगाभरणसमुत्प
न्नैःउदारैःमहद्भिःउद्योतैःकिरणैःकनकमयलसत्कुंडलोल्लेखैःसोवर्णैराजत्कुंडलकिरणैःकौस्तुभस्या
प्युरुभिःपृथुभिःउद्योतैःउपचितोवर्धितःचित्रवर्णःशबलितरुचिःविभाति कंठाश्लेषेकंठालिंगनेरमा
यांकरवलयपदैःतद्विन्यासैःमुद्रितेसंजातमुद्रेभद्ररूपेमंगलकारेक॥३४॥श्लोक॥पद्मानंदप्रदातापरि
लसदरुणश्रीपरीताग्रभागःकालेकालेचक्रबुग्रवरशशधरापूरणेयःप्रवीणः॥वक्राकाशांतरस्थःस्थिर
यतिनितरांदेवतारोघशाभांश्रीभर्तुर्दैवतंवासोद्युमणिरघतमोनाशमायास्त्वसौनः॥३५॥टीका॥पद्मानंदंवि
तन्वानमरुच्छ्रीपुरस्कृतं॥पतिंविषामिषाचार्यास्तुवंतिश्रीप्रियाधरं॥पद्मेति॥असौश्रीभर्तुर्दैवतंवासोद्युम
णिःअधरसूर्यःअघतमोनाशनायपापांधकारसंहारणायनितरामस्तुभवतुकीदृशःपद्मानंदप्रदातापद्मा

याः लक्ष्म्याः आनंदकरोपक्षेकमलानंदकरः परिदृश्यदरुणश्रीपरिताम्रभागः परिवृतपूर्वभागः काले काले चत
त्सुमनये कबुप्रवरशशधरापूरणेशंखश्रेष्ठएवशशांकः तत्पूरणेप्रवीणः वक्त्राकाशांतरस्थः मुखमेवव्योम त
न्मध्येस्थः दंततारोघशोभांदंतनक्षत्रपंक्तिकांतिपक्षेदंतसदृशतारकनिकरकांतिंतिरयति अंतर्हिनांकरोति॥
३५॥श्लोक॥निस्यंस्नेहातिरेकान्निजकमितुरलंविप्रयोगाक्षमायावक्त्रेदोरंतरालेहृतवसतिरियाभातिनक्षत्र
राजिः॥लक्ष्मीकांतस्यकांताहृतिरतिविलसन्मुग्धमुक्ताफलश्रीर्दंतालिःसंततंसानतिंतिनिरतान्रक्षतादक्ष
नान्नः॥३६॥टीका॥चंद्रबिंबांतरालस्थतारापंक्तिविडंबिनी॥दंतश्रेणिमुरारातेरस्मिन्पद्येनिगद्यते॥निस्यमि
ति॥लक्ष्मीकांतस्यदंतालिःदंतपंक्तिःनतिनुतिनिरतान्नमस्कारस्तुतिपरान्नःअक्षतान्पीडाविनिर्मुक्तान्कु
र्वंतिसतिरक्षतात्पालयतु नित्यंध्रुवंस्नेहातिरेकात्प्रेमातिशयात्निजकमितुरात्मकामुकस्यवक्त्रेदोरंगेव
न्मुखचंद्रस्यविप्रयोगाअसहा अंतरालेबिंबमध्येहृतवसतिः हृतवेश्मानक्षत्रराजिः नागपंक्तिरिव अलंभाति
कांताकृतिः मनोज्ञवेषा अतिविलसन्मुग्धमुक्ताफलश्रीः अत्यंतशोभमानासुंदरमुक्तामणिकांतिः संततनविरतं
॥३६॥श्लोक॥ब्रह्मन्ब्रह्मण्यजिह्मांमतिमपिकुरुषेदेवसंभावयेत्वांशंभोशक्त्रिलोकीमवसिकिमनरेनीरदा
द्याःसुरवरः॥इत्थंसेवावनम्रसुरमुनिनिकरंवीक्ष्यविष्णोःप्रसन्नस्यास्येदोरम्यवंतीवरवचनसुधास्रादयेन्मा
नसंनः॥३७॥टीका॥मुरारिमुखचंद्रांतर्गलत्सूक्तिसुधाझरी॥शंभुब्रह्मेंद्रदेवर्षिप्राणिकृतस्तूयतेधुना॥ब्रह्मन्नि
ति॥प्रसन्नस्यप्रसादयुक्तस्यविष्णोरास्येदोर्मुखचंद्रादास्रवंतीनिर्यदमानावरवचनसुधाउत्कृष्टसूक्तिकामृत
धारानःमानसंह्लादयेत्संतोषयतु ब्रह्मन्कमलासनब्रह्मणिवेदेअजिह्मांऋजुमतिंकुरुषेअपि वेदशास्त्र
तोअर्थतश्चनविस्मरसिकिं हेदेवशंभोशंसुरंभवत्यस्मादितिशंभुः सर्वलोकक्षेमकरत्वांसंभावयेसत्करोमि
शक्रदेवेंद्रअमरैःसहत्रिलोकात्रिलोकानवासिकिंनारदाद्याःनारदप्रमुखाःसुरर्षयःवःयुष्माकंसुखंकिं इत्थं
॥२॥

मेघसेवावनम्रंभजनेप्रह्वीभूतंसुरमुनिनिकरंसकरुणंमुनीनांचसमूहंवीक्ष्यविशेषेणहृष्टारसत्तरंगितापोगं
हृष्या॥३७॥श्लोक॥वक्त्राब्जेलसंतंमुकुरधरमणिंपंकजेबाभिरामंहृद्यादृश्यंकस्यसुरमनतरतस्तुंड
देंजयतेयः॥घोणःशोणायितात्माश्रवणयुगलसत्कुंडलोल्लेखमुरारेः प्राणाख्यस्यानिलस्यप्रसरणसरणिः प्राण
दानायनस्तात्॥३८॥टीका॥ओष्ठबिंबस्यहाभातशुकचंचूयितादृतिः॥कर्णिकामणिभारक्षाहरेर्नासहकीर्त्य
ते॥वक्त्रेति॥मुरारेःघोणानासिकानःप्राणदानायस्तात्आयुर्ददातु श्रवणयुगलसत्कुंडलाख्येःश्रुतियुगल
शोभमानकुंडलकिरणैःशोणायितात्मारक्तीकृतस्वरूपःप्राणाख्यवायोःहृदयदेशसंचारिणःप्रसरणस
रणिःसंचारमार्गःवक्त्राब्जेभगवन्मुखकमलेलसंतंदीप्यमानंपद्मबिंबाभिरामंपद्मबिंबफलहृद्यं अ
धरमणिंओष्ठरूपपद्मरागमणिंदृष्टादृष्टमवतरतःप्रसनाथावरोहतःशुकस्यतुंडंदेशायतेचंचुयष्टिव
दाचरति॥३८॥श्लोक॥कर्णस्थस्वर्णकुंडोज्वलमकरमहाकुंडलप्रोतदीप्यन्मणिक्यश्रीप्रतानेःपरिमिलित
मलिश्यामलंकोमलंयत्॥प्रोद्यत्सूर्यांशुराजन्मरकतमुकुराकारचोरंमुरारेर्गंडाभागामिनींनोगमयतुविपदं
गंडयोर्मंडलंतत्॥३९॥टीका॥हरेर्मरकतादर्शबिंबिताकरचोहसत्॥कर्णिकामणिभाकीर्णगंडयुग्ममिहे
ड्यते॥मुरारेर्गंडयोर्मंडलंकपोलयुगलंगोदोहदाआगामिनींआगमिष्यंतींविपदंविपत्तिंगमयतु अपन
तु कीदृशं कर्णस्थस्वर्णकुंडोज्वलमकरमहाकुंडलप्रोतदीप्यन्मणिक्यश्रीप्रतानेःश्रवणस्थितस्वर्ण
कांततेजिष्णुमकराकारबृहत्कर्णाभरणलसन्मणिक्यप्रभाराशेःपरिमिलितं परितःसंपृक्तं अलिश्याम
लंभ्रमरश्यामलंकोमलंसुकुमारंयत्प्रोद्यत्सूर्यांशुराजत्मरकतमुकुराकारचोरंप्रह्लादोदयतरणि
किरणविराजमानमरकतमयदर्पणरूपस्तेनो॥३९॥श्लोक॥दिक्कालौवेदयंतौजगतिमुकुरिभौसंचरंतौ
र्यदृङ्नेत्रालोक्यालोकदीपावभिदधतिबुधायोरवरूपंमुनींद्राः॥अस्मानभ्रमंतंप्रचुरतरकृपानिर्भरंप्रे
क्षमाणपातामातामात्रशुद्धासितरुचिरुचिरापद्मनेत्रस्यनेत्रे॥४०॥टीका॥स्यांचेमसोदीपौत्र
माणाजगतामपि॥यदंत्येतेवेष्णवीयौवर्ण्यतेशोभनदृशौ॥दिगिति॥पद्मनेत्रस्यनेत्रे कमललोचन

स्मनयने अस्मान् पातां पालयेतां कीदृशे अब्जप्रभे कमलकांतिनी प्रचुरतरकृपानिर्भरंबहुलतमदयाभरितंयथाभवतितथा प्रेक्षमाणे प्रकर्षेणपश्यते आतान्त्रशुक्लासितरुचिरुचिरे आपाटलधवलनीलकांतिमनोज्ञे ययोरुपमेवस्वरूपमेवमुनींद्राः मुनिश्रेष्ठाः अग्निर्मूर्धाचक्षुषिचेद्रसूर्यावितिश्रुतेः मुहुःसंचरंतौअसकृद्भ्रमंतौ दिक्कालौवेदयंतौअहोरात्रादिव्यपदेशस्यप्राच्यादिविभागस्यचतद्धीनत्वात् जगतिरमोदृश्यमानौत्रैलोक्यालोकदीपौलोकत्रयस्यआलोकनार्थदीपौरवींदुसूर्यावेद्रमसेो॥४०॥श्लोक॥लक्ष्माकारालकालिस्फुरदलिकशशांकार्धसंदर्शमिलन्नेत्रांभोजप्रबोधोत्सुकानिभृततरालीनभृंगच्छटाभे॥लक्ष्मीकांतस्यलक्ष्मीकृतविबुधगणापांगबाणासनार्धछायेनोभूरिभूरिप्रसवकुशलदेभ्रूतलेपालयेतां॥४१॥टीका॥भ्रूवल्ल्यौयुगलीविष्णोरक्षिपक्ष्मालिमालिका॥आलोकबाणकोदंडरंध्रउश्रीरत्रवर्ण्यते॥लक्ष्मेति॥लक्ष्मीनाथस्यभ्रूलते भ्रुवावेवलतेवल्योनःअस्मान्पालयेतां लक्ष्मणःचिन्हस्याःकृतिरिवआकृतिर्यस्याःसतथा अलकालिःअलकसमूहः तयास्फुरद्भासमानंअलिकमेवशशांकार्धंललाटमेवचंद्रशकलंतस्यसंदर्शनेनमीलतीमुकुलीभवतीनेत्रेएवअंभोजेययोःप्रबोधोत्सुकाविकासेसक्तःनिभृततरालीनानिश्चलतरालग्नाचयाभृंगच्छटाभ्रमरपंक्तिःतस्याआभेवाभायययोस्तेतया लक्ष्मीकृतविबुधगणापांगबाणासनार्धछाये अपांगरूपोबाणोऽपांगबाणःलक्ष्मीकृतःशरव्यीकृतःविबुधगणःदेवसमूहोयेनसतथासःबाणःअस्यतेक्षिप्यतेअनेनेतिआसनंधनुःतस्यधनुषःखंडस्यछायाकांतिरिवकांतिर्ययोस्तेभ्रूरिभृतिप्रसवकुशलदेबहुलैश्वर्यप्रभवक्षेमदायिन्यो॥४१॥श्लोक॥पातात्पातालपातासुतगपतिगतेर्भ्रूयुगंभग्नमध्यंयेनेषच्चालितेनरुषपदनियमिताःसासुराद्देवसंघाः॥नृत्यद्बालाटरंगैरजनिकरतनोरर्धखंडावदातेकालध्यालद्वयंवाविलसतिसमयाबालिकामातरंनः॥४२॥टीका॥बालिकापन्नगीसूतकृष्णाहिपृथुकायितं॥भ्रूयुगंस्तूयतेविष्णोर्देवासुरव

रमर्दा॥पातादिति॥पतगपतिगतेःपतगपतिनापक्षिराजेनगतिःसंचारोयस्यतस्यहरेःभग्नमध्यकुटिलमध्यप्रदेशंभ्रूयुगंनःपातालपातादधोलोकपतनात्पातुरक्षतु ईषच्चालितेनअधःस्पंदितेनयेनसासुराःअसुरसहितादेवसंघाःदेवसमूहाःस्वपदनियमिताःस्वकीयस्थानेनियंत्रिताःभवंति रजनिकरतनोःचंद्रस्यअर्धखंडावदातेअर्धशकलवद्गौरे ललाटरंगललाटसंबंधिनिनृत्यस्थानेनृत्यत्नर्तनंकुर्वत् बालिकामातरंसमयाकर्णोपरिस्थितभूषणविशेषस्यसनीयेकालध्यालद्वयंसर्पद्वितयंविलसतिदीप्यते॥४२॥श्लोक॥रुक्षस्मारेक्षुचापच्युतशरनिकरक्षीणलक्ष्मीकटाक्षप्रोत्फुल्लत्पद्ममालाविलसितसहितस्फारिकेशानलिंगं॥भ्रूयुग्मस्तूयतेविष्णोरमभुवनपतेर्भ्रूलताहृद्ध्यानध्यातुस्थतत्पुंड्रमूर्ध्वंजनिमरणतमःखंडनंमंडनंच॥४३॥टीका॥लक्ष्मीविलोचनांभोजपूजितमधुवैरिणः॥भ्रूद्वयंमूलतोभ्युत्थमूर्ध्वपुंड्रमिहेष्यते॥रुक्षेति॥रुक्षस्मारेक्षुचापच्युतशरनिकरेणभग्नमन्मथसंबंधीक्षुधनुर्निर्गतबाणसमूहेनक्षीणायाःपीडितायाःलक्ष्म्याःकटाक्षःअपांगदर्शनंसएवप्रोत्फुल्लत्पद्ममालाविलसितःविकसितकोकनदसमूहस्तेनसहितस्फारिकेशानलिंगंअर्चितस्फारिकलिंगंशिवेअत्रमदनबाधितश्रीरुद्धरिणांशेचेकटाक्षमूलेनभ्रूजयतीतिध्वनितं भुवनपतेःभ्रूलताहृद्ध्यानंजगन्नाथस्यभ्रूवल्लिकांतरालादुत्थंउत्थितं जनिमरणतमःखंडनंजननमृतिहेत्वज्ञाननिवर्तकंमंडनमलंकारभूतंचममोपासकस्यभूयोविभूत्येबहुलैश्वर्ययभूयात्णवतु।अथनमस्कृत्यभगवान्नारदःसर्वेश्वरंवासुदेवंपप्रथभगवान्ब्रूर्ध्वपुंड्रविधिंद्रव्यंचस्थानादिसहितंमेब्रूहीतिहोवाचभगवान्वासुदेवःवैकुंठस्थानोद्भवंमद्भक्तैर्ब्राह्मणादिभिर्धारितंवैकुंठस्थानादाहृत्यहृद्यायोमयाप्रतिक्षिप्तंतच्चंदनंकुंकुमादिसहितंविष्णुचंदनंमद्भक्तैःप्रतिदिनमालिप्तंगोपीभिःप्रक्षालनात् गोपीचंदनमाख्यातं॥गोपीचंदनपापघ्नविष्णुदेहसमुद्भव॥चक्रांकितनमस्तुभ्यंधारणान्मुक्तिदोभवत्॥ब्रह्मरंध्रेभ्रुवोर्मध्येहृदयेचहरिंहरिं॥गोपीचंदनमालिप्यतत्रध्यात्वामुयात्पदं॥ऊर्ध्वंदंडमूर्ध्वरेता

श्व ऊर्ध्वयोगवित्। सऽऊर्ध्वपदमाप्नोति यति ऊर्ध्वचतुष्कवान्॥ ब्राह्मणानां तु सर्वेषां वैदिकानामनुक्रमो योपी
चंदनवारिभ्यामूर्ध्वपुंड्रविधीयते॥ इत्यादिवाक्यदेवोपनिषदि भगवता वासुदेवेननारदं प्रत्यूर्ध्वपुंड्रविधेः
प्रपंचितत्वात् श्रीमच्छंकराचार्यैरपि भगवत्संबंध्यूर्ध्वपुंड्रवर्णनात् ऊर्ध्वपुंड्रस्यसकलवैदिकधार्यत्ववैदि
कधार्यलमुक्तिसाम्यमित्यनुसंधेयं॥ ४३॥ श्लोक॥ मालालोलालिधाम्नः कुवलयकलिताश्रीपतेः कुंतलालिः
कालिंद्यारुह्यमूर्ध्वं गलति हरशिरः स्वर्धुनीस्पर्धयानु॥ राहुर्वा यातिवक्रं सकलशशिकलाभ्रांतलोलांतरा
त्मालोकेरालोच्यतेयाप्रदिशतुसततंसाखिलंमंगलंनः॥ ४४॥ टीका॥ मालेवोत्पलसंदृब्धायमुनेवशिरोगता॥
स्वर्भानुतनुवत्कालीकचालीवर्ण्यतेहरेः॥ मालेति॥ अलिधाम्नः भ्रमरकांतेः श्रीपतेः कुंतलालिः केशसंदृब्धः
नः अखिलंमंगलंसमस्तकल्याणं सततमविरतं प्रदिशतु ददातु कीदृशी कुवलयकलिता उत्पलनिर्मितामा
लालीवमाल्यपंक्तिरिवस्थिता हरशिरः स्वर्धुनीस्पर्धयाशिवमौलिस्थितसुरनदीसंस्पर्धया कालिंदीयमुना
भगवन्मूर्धनिंआरुह्यततोगलतिनुक्षरतिकिं अथवाराहुः सैंहिकेयः सकलशशिकलाभ्रांतलोलांतरात्मा
समस्तचंद्रार्थभ्रांतः अनवस्थितःलोलः सतृष्णाभ्रांतरात्मा अंतःकरणं यस्यसतथा यत्कंमुखंआयाति आ
गच्छतिकिं इतिलोकैरुपासकजनैरालोच्यतेविचार्यते॥ ४४॥ श्लोक॥ पीठीभूतालकांते कृतमुकुटमहादेवलिं
गप्रतिष्ठेलालाटेनाद्यरंगेविकटतरतटेकेटभारेश्चिराय॥ प्रोद्यद्वैवाल्लतंद्रीप्रकटपटकुटीप्रस्फुरंतींस्फु
टांगीं पट्वीयंभावनाख्यंचटुलमतिनटीनाटिकांनाटयेन्नः॥ ४५॥ टीका॥ अधुनोपासकप्रज्ञानाटीरंगस्थ
लायितं॥ अलिकंवर्ण्यतेविष्णोराचार्यैर्भावनापरं॥ पीठीभूतेति॥ केटभारेः हरेः भावनाख्यं ध्यानसंज्ञिकां
नाटयेन्नर्तयेत्तु पट्वीनिपुणाचटुलमतिनटीचंचलचित्तनर्तकी पीठीभूतालकांते आसनीभूतालकाग्रे कृ
तमुकुटमहादेवलिंगप्रतिष्ठेविरचितकिरीटरुद्रशिवलिंगस्थापनेललाटेनाद्यरंगे ललाटसंबंधिनी नृत्य
स्थानेविकटतरतटे अत्यंतविस्तृततटे आत्मतंद्रींनिजामलसतां प्रकटपटकुटींस्फुटपटगृहजवनिकामि

MEMORIAL
॥११॥

तियावत्प्रोद्यद्वैवाप्सार्यैवानंतरमेवस्फुरंतींप्रकाशमानांस्फुटांगीं पट्वीयंभावनाख्यंचटुलमतिनटी
संनिधोन्नत्यंकुर्वतीतिमुकुटस्यशिवलिंगत्वेनोप्रेक्षा॥ ४५॥ श्लोक॥ सुप्ताकाराः प्रसुप्तेभगवतिविधु
धेरप्यदृष्टस्वरूपाध्यानेरोमांतरालास्फुरदमणिरुचारंजितास्यप्रभासः॥ देहच्छायोद्गमाभारिपुवपुरगरु
प्लोषिरोपाग्निधूमाः केशाःकोशिद्विषोनोविदधतुविपुलक्लेशपाशप्रणाशं॥ ४६॥ टीका॥ निद्राकारासुरारातेः
शादेहप्रभायिता॥ कोपाग्निधूमाः स्फुरंत्यास्ताकाशाः स्फुरत्सिपः॥ सुप्ताकाराइति॥ केशिद्विषः केशिनामासुरद्रोहि
णःहरेःकेशाःशिरोरुहाः नःविपुलक्लेशपाशप्रणाशंविस्तृतरागद्वेषाद्यभिनिवेशजनितसंसृतिसंबंधविछेदनंविदध
तुकुर्वंतु कीदृशाः भगवतिहरौसुप्तेनिद्राणेसतिसुप्ताकाराः सुप्तस्यनिद्रायाः आकारइवाकृतिर्येषांते त
थालोकरीत्यानिद्रायाकृतानस्वेनकृष्णाकारत्वमितिभावः विधुधेरापदेवैरपिअदृष्टस्वरूपाः अनिर्धा
रितमहिमानः व्याप्तव्योमांतरालाः अतिक्रांतगगनमध्याः तरलमतिरुचारंजितास्यप्रभासः तरलयाचं
चलयामणीनांमुकुटमणीनांरुचाकांत्यारंजितत्वेनअस्यप्रभासः अनभिव्यक्तनीलिमानः देहच्छायोद्गमा
याः शरीरकांतिप्रसरसमानभासः रिपुवपुरगरुप्लोषिरोपाग्निधूमाः शत्रुशरीररूपागरुरुक्षदहनशीलकोपाग्नि
धूमाःअगरुवह्निधूमस्यकाप्यतिशयादगरुत्वोक्तिः॥ ४६॥ श्लोक॥ यत्रप्रत्युप्तरत्नप्रवरपरिलसद्भूरि
रोचिःप्रतानस्फूर्त्यामूर्तिर्मुरारेर्द्युमणिशतचितव्योमवद्दुर्निरीक्ष्या॥ कुर्वन्पारेपयोधिज्वलदकृशशिरवा
भास्वदोर्वाग्निशंकांशश्वन्नःशर्मदिश्यात्कलिकलुषतमःपाटनंतत्किरीटं॥ ४७॥ टीका॥ रत्नमणिद्युतिभिर्वि
ष्णोर्मूर्तिरिवशताचितं॥ विडंबयंतीमाकाशंकुर्वन्मुकुटमीप्सितं॥ यत्रेति॥ मुरारेःकिरीटंनःशर्मदिश्यात्सुखंददातु
कीदृशं कलिकलुषपाटनं पापरूपांधकारनिवर्तकं पारेपयोधिसमुद्रपारेज्वलदकृशशिरवाभास्वदोर्वा

ग्निशंकोद्दीप्यमानबहुलहेतिशतासुरवडवामुखाग्निशंकोकुर्वन्जनयन्यत्रयस्मिन्सुकृदे प्रत्युत्तरत्नप्रवरपरिकरसङ्घरिंगाचिःप्रतानस्फूर्त्याप्रत्युप्तानोप्तानांरत्नप्रवराणांमणिश्रेष्ठानांपरिकल्पतांदीप्यमानानांभूरीणांबहुलानांरोचिषांतेजसांप्रतानस्फूर्त्याप्ररोहस्फुरणेनमुरारेर्मूर्तेःघुमणिशतचित्तप्यो भवत्एककालोह्युत्तरस्फोतनिबिडताकाशवत्दुर्निरीक्ष्याद्दुःखेनद्दश्याभवति॥४७॥श्लोक॥भ्रांत्वाभ्रांत्वायदंतस्त्रिभुवनगुरवेऽप्यब्दकोटीरनेकांनेतुंनतंसमर्थोभ्रमरइवपुनर्नाभिनालीकनालात्॥उन्मज्जन्नूर्जितश्रीस्त्रिभुवनमपरंनिर्ममेनत्सदक्षंदेहांभोधिःसदेयान्निरवधिममृतंदेत्यविद्वेषिणोनः॥४८॥टीका॥त्रिलोकींवीक्ष्ययस्यांतस्तादृशीमयसांविधिः॥अस्त्वक्षीरसमुरारातेर्देहाब्धिरिहवर्ण्यते॥भ्रांत्वेति॥देत्यविद्वेषिणःदानवारेःदेहांभोधिःशरीरमेवसमुद्रःनःनिरवधिममृतंअपरिच्छिन्नानंदंदेयात्ददातु समुद्रादमृतोत्पत्तिरिति तथावर्णनंयस्यांतराभ्यंतरप्रदेशेत्रिभुवनगुरुरपित्रयाणांभुवनानांगुरुःब्रह्मापिअनेकाःअब्दकोटीःबहुषुसंवत्सरकोटिषुभ्रांत्वाभ्रांत्वाअभीक्ष्णेनभ्रमणंकृत्वाअंतंगंतुंनसमर्थःअवसानंज्ञातुंनशक्तआसीत् पुनर्भूयःभ्रमरइवनाभिनालीकनालात्नाभिपद्मनालात्उन्मज्जन्नुद्गच्छन्ऊर्जितश्रीःदृढतरविद्याकलापःसाहिश्रीरमृतासतामितिश्रुतेःअपरंतत्सदृशंउदरंतस्थितत्रिभुवनसदृशंलोकत्रयंनिर्ममेसःस्वान्॥४८॥श्लोक॥मत्स्यःकूर्मोवराहोनरहरिणवपुर्वामनोजामदग्न्यःकाकुद्स्थःकंसघातीमनसिजविजयीयश्चकल्कीभविष्यत्॥विष्णोरंशावतारास्त्रिभुवनहितकराधर्मसंस्थापनार्थाःपायासुर्नस्तएतेगुरुतरकरुणाभारखिन्नाशयायेभ्यः॥४९॥टीका॥शेषेशंयंपरंवस्तुपास्यमत्स्यादिभूमिकं॥आचार्याभगवन्मूर्तिमनुसंदधतेधुना॥मत्स्यइति॥नरहरिणवपुःनरसिंहःमनसिजविजयीबलभद्रःरुद्रावतारत्वात् गुरुतरकरुणाभारखिन्नाशयाःगुरुतरेणअधिकतरेणकरुणाभारेणदयाभारेणखिन्नः

दुःखितःआशयोयेषांतेतथा कृपालवोहिपरदुःखेनेवदुःखिनोभवंतिइतिप्रसिद्धंलोकेपायासुरक्षंतुअन्यत्सर्वंसुगमं॥४९॥श्लोक॥यस्माद्वाचोनिवृत्ताःसममपिमनसालक्षणामीक्ष्यमाणाःस्वार्थात्लाभात्परार्थव्यपगमकथनस्याधिनोवेदवादाः॥नित्यानंदस्वसंविन्निरवधिममलस्यांतसंक्रांतबिंबछायापत्यापिनित्यंसुखयतियमिनोयत्तदध्यान्महोनः॥५०॥टीका॥नित्यसुस्थचिदानंदसत्यसूक्ष्मादुयंविभुं॥मुक्तंसदागमोक्तैकगम्यमग्रेऽद्यतेमहः॥यस्मादिति॥तन्महःसच्चिदानंदज्योतिःनःअस्मान्अव्यात्अविद्यानिवर्तनेनस्वात्मतांनयतु॥कीदृशं यस्माद्वाचोपिनिवृत्ताःमनसापिसमंयस्मान्महसःसकाशात्सर्वेशाःमनसाचसाकंनिवृत्ताःब्रह्मविषयीकर्तुमक्षमाःसंतोनिवर्तंते॥यतोवाचोनिवर्तंतेअप्राप्यमनसासहेतिश्रुतेः॥मनसोपिसाक्षिणीब्रह्मणिमनःप्रवृत्त्ययोगात्॥वाचांनिवृत्तौहेतुमाह॥स्वार्थात्लाभादिति॥स्वप्रवृत्तिनिमित्तजात्यादेःअथातआदेशोनेतिनेतिइत्यादिनानिरस्तसमस्तविशेषेब्रह्मणिअसंभवादित्यर्थः नन्वेवंब्रह्मसिद्धिर्नस्यात् अन्यस्यप्रमाणस्यासंभवादत्राह लक्षणामीक्षमाणाइति मुख्यवृत्तभावेपिलक्षणामीक्षमाणावेदांताःबोधयंतीत्यर्थः नन्वेवमपिब्रह्मणःतत्रोपनिषदमित्यादिश्रुतिबोधितोपनिषज्जन्यज्ञानविषयत्वरूपोपनिषदत्वानुपपत्तिःस्वयंप्रकाशत्वेनज्ञानाविषयत्वादन्यथाजडत्वप्रसंगादित्यतआह परार्थव्यपगमकथनस्याधिनइतिपरार्थव्यपगमेनब्रह्मव्यतिरिक्ततदध्यस्ताज्ञानतत्कार्यकर्तृत्वादिप्रपंचनिरासेनकथनेब्रह्मणःउपनिषद्भिःप्रतिपादनेऽधिकृतेशीलंयेषांतेतथावेदवादाःतत्रोपनिषदमित्याद्याःब्रह्मणःस्वप्रकाशत्वेनउपनिषज्जन्यज्ञानजनितातिशयधारत्वाभावेपितज्जन्यनिरस्ताज्ञानाश्रयविषयत्वमात्रेणौपनिषदत्वमुपपद्यते कूपाद्याकाशस्याकार्यस्यापितत्संबंधिमृत्तिकानिरासेनकार्यत्वव्यपदेशवत् नन्वेवमपिब्रह्मणःउपनिषज्जन्यज्ञानविषयत्वाभावेतेननतद्ज्ञाननिवर्त्तिसंभवतिअज्ञानसमानविषयज्ञानस्यतन्निवर्तकत्वात् अतआह नित्यानंदेत्यादिना नित्यानंदस्वसंविन्निरवधि

चयन्महः नित्यंसार्वकालिकंआनंदःसुखंरूपंस्वंवित्स्वप्रकाशंनिरधिदेशकालवस्तुपरिछेदशून्यंनित्यं
विभुसर्वगतंसुसूक्ष्मंविज्ञानमानंदंब्रह्मअथायंपुरुषःस्वयंज्योतिरेकमेवाद्वितीयमित्यादिश्रुतेः विमलस्वांत
संक्रांताबिंबछायापत्त्वाविमलमतिस्वच्छयत्स्वांतमंतःकरणंतत्रसंक्रांतायाबिंबछायाबिंबस्यपूर्णचैतन्यस्यछा
यापतिबिंबंतदापत्त्यादिश्रुतेः ब्रह्मज्ञानस्यब्रह्मविषयत्वाभावेपितत्प्रतिबिंबधारित्वरूपतदाकारतासंभवादपि
तदज्ञाननिवर्तकत्वमुपपद्यते अत्रसगुणब्रह्मभूतनारायणोपासनापरिपाकशुद्धांतःकरणानांमुख्याधिकारिणां
निर्गुणब्रह्मनिरूपणमित्यनुसंधेयं॥५०॥श्लोक॥आपादादाचशीर्ष्णोवपुरिदमनघंचैष्णवंयःस्वचित्तेधत्तेनित्यंनिरस्ता
खिलकलिकलुषंसंततांतःप्रमोदः॥जुह्वज्जिह्वाहुताशेनोनरहरिचरितंस्रोत्रमंत्रानुपाठेत्पादांभोरुहाभ्यांसततमपिन
मस्कुर्महेनिर्मलाभ्यां॥५१॥टीका॥आपादशिकुरंविष्णोरंगंध्यायन्स्तुवन्नपि॥आचार्यैर्वर्ण्यतेभक्तिमाहात्म्यस्फूर्तयेनृ
पुमान्॥आपादादितिः॥आपादाच्चरणमारभ्यआचशीर्ष्णःशिरःपर्यंतंअनघंनिष्पापंउपासकानांअघघ्नंइदंवैष्णवंवपुःव
र्णितंविष्णोःशरीरंनिरस्ताखिलकलिकलुषेअपास्तकल्मषेस्वच्छेस्वचित्तेनिजहृदयेधत्तेसंततांतःप्रमोदःसन्प्र
विस्फुतःअंतरानंदःयस्यसतथा भगवध्यानेह्यानंदादयइतिभावः पुनःकीदृशः स्तोत्रमंत्रानुपाठेएतत्स्तोत्ररूप
मंत्रपाठयुक्तेजिह्वाहुताशेनोरसाग्नेनरहरिचरितंनृसिंहमूर्तेर्भगवतःचरितंजुह्वत्हविरूपेणप्रक्षिपन्भगवत्कथां
कीर्तयन्इतियावत् निर्मलाभ्यांशुद्धाभ्यांतत्पादांभोरुहाभ्यांतच्चरणारविंदाभ्यांनमस्कुर्महेनमस्कारमाचरामः अ
त्रश्रीमच्छंकराचार्यैर्भगवदुपासकानमस्कारकथनेनविष्णुमुख्यानामतिगरिष्ठत्वंतज्ज्ञानामप्यखिललोकपूज्यत्वं
चश्रुतिस्मृतिपुराणसिद्धंसूचितं॥५१॥श्लोक॥मोदात्पादादिकेशस्तुतिमितिरचितांकीर्तयित्वात्रिधाम्नः पादाब्ज
द्वंद्वसेवासमयकृतनतिर्निस्तकेनामनेघः॥उन्मूल्येवात्मनेनोनिचयकवचतांपंचतानेत्यभानोर्बिंबांतर्गोचरंसप्र
विशातिपरमानंदमात्मस्वरूपं॥५२॥टीका॥नारायणीयपादादिकेशस्तुतिपराजनाः॥स्तौतीतिब्रह्मणित्वेतदाचा

र्भेरुपवर्ण्यते॥मोदादिति॥त्रिधाम्नः त्रीण्यनित्यव्यक्तिस्थानानियस्यतस्यभगवतः इत्युक्तप्रकारेणरचितांकृतांपा
दादिकेशस्तुतिंकीर्तयित्वासम्यक्पठित्वायःसाधकःपादाब्जद्वंद्वसेवासमयकृतनतिःभगवत्पादारविंद
युगलभजनवेलायांरचितप्रह्वीभावःसन्आनमेत्नमस्कुर्यात्सःआत्मनास्वयमेवएनोनिचयकवचतांपाप
समूहरूपोरुछदसंबंधंउन्मूल्येवसमूलकाषंकपित्वेवपंचतांएतस्यपांचभौतिकदेहसंबंधपरित्यागेप्राप्यभा
नोःसूर्यस्यबिंबांतर्गोचरंमंडलाभ्यंतरेसंनिहितत्वेनप्रतीयमानंयएषोंतरादित्येहिरण्मयःपुरुषइत्यादिश्रु
तेः परमानंदात्मस्वरूपंप्रविशतितत्रैवलीयतेब्रह्मानंदस्वरूपेणावतिष्ठतइतिसिद्धं॥५२॥ ॥ इतिश्रीमत्
परमहंसपरिव्राजकाचार्यश्रीपरमानंदविरचितायांश्रीमद्विष्णुपादादिकेशस्तुतिसुखबोधिनीनामव्याख्यासमाप्ता
॥ ॥ श्रीगुरुचरणारविंदार्पणमस्तु॥ ॥ श्रीकेशवार्पणमस्तु॥ ॥शुभंभवतु॥ ॥

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017